# INTERNATIONAL RESEARCH JOURNAL OF MANAGEMENT SOCIOLOGY & HUMANITIES

**ISSN 2277 – 9809 (online)**
**ISSN 2348 - 9359 (Print)**

*An Internationally Indexed Peer Reviewed & Refereed Journal*

www.IRJMSH.com
www.isarasolutions.com

Published by iSaRa Solutions

# वैदिकवाङ्मये भक्तितत्त्वम्

**Mampi Das**
Research Scholar

Central Sanskrit University, Ekalavya Campus

Agartala West Tripura

भारतीयज्ञानपरम्परायां वैदिकसाहित्यं विशालं वर्तते, यस्मिन् वेदानां संहिताग्रन्थाः ब्राह्मणग्रन्था आरण्यकग्रन्थाः उपनिषदां वेदाङ्गानाञ्च ग्रन्थाः विद्यन्ते। तेषु वैदिकसंहिताग्रन्थाः प्राचीनतमाः मन्यन्ते। वैदिकसंहितासु चत्वारो वेदाः – ऋग्वेदो यजुर्वेदः सामवेद अथर्ववेदश्च अन्तर्भवन्ति। तेषु प्राचीनतमं वैदिकसाहित्यम् अस्ति ऋग्वेदः। तत्प्रभावेण अन्तिमाः त्रयो वेदाः यजुर्वेदः सामवेद अथर्ववेदश्च प्रभाविताः सुपुष्टाश्च सन्ति।

एतत् समग्रं वैदिकसाहित्यं गुरुकूले श्रुतिपरम्परया प्रसारितमभूत्। गुरुकूलानि शिक्षायाः आधारस्तम्भाः आसन्। शिक्षार्थिनः अष्टादशविद्यानाम् अध्ययनेन चतुर्विधान् पुरुषार्थान् प्राप्नुवन्ति स्म। गुरोः निर्देशनेन अन्तेवासिनः ब्रह्मचर्यस्य पालनं कुर्वन्तः नित्यानुष्ठानानामभ्यासं कृत्वा तेजवन्तः वीर्यवन्तश्च भवन्ति स्म। वायुपुराणे उल्लेखो वर्त्तते यत् गुरुरूपतीर्थादेव सिद्धिप्राप्तिर्जायते।

प्राचीनभारतीयसनातनज्ञानपरम्परा अतीवसमृद्धा आसीत्। अस्याः उद्देश्यं यत् मनुजः श्रृङ्खलितः सन् ज्ञानपरम्परयैव स्वजीवने धर्मार्थकाममोक्षान् समाहितान् कृत्वा सम्पूर्णव्यक्तित्वविकासं कुर्यादिति। यदा सम्पूर्णं विश्वम् अज्ञानान्धकारे मग्नमासीत् तदा भारतस्य मनीषिणः उच्चतमज्ञानस्य साक्षात्कारं कृतवन्तः। तस्यैव निर्मलज्ञानस्य प्रचारप्रसारादिभिः मानवान् मुक्तिप्रदानाय ते अयतन्त। **कृण्वन्तः विश्वमार्यम्**। ते ऋषयः प्राप्तज्ञानरहस्यान् श्रेष्ठसंस्कारोपेतान् कृत्वा सर्वेषां मानवानां व्यक्तित्वनिर्माणं कृतवन्तः। अतः इदानीं तस्याः ज्ञानपरम्परायाः प्रत्यावर्त्तनेन भारतदेशः पुनः विश्वगुरुः भवितुं शक्नोति इति नास्ति सन्देहः।

**वैदिकज्ञानपरम्परा-**

भारतीया ज्ञानपरम्परा वेदादारभ्य प्रवर्त्तमाना वरीवर्त्ति। **'सर्वं वेदात् प्रसिद्ध्यति'[1]।** वेदं विहाय ज्ञानपरम्परायाः विचार एवात्र न विद्यते। अतः वैदिकज्ञानपरम्परा भारतवर्षस्य मूलमिति कथ्यते।

---

[1] मनुस्मृतिः 12/97

तत्र सर्वादौ वेदस्वरूप एव ज्ञातव्यो भवति । वेद नाम किमित्युक्ते वेदाः वैज्ञानिकैः ऋषिभिः प्राचीनभारतीयैरूत्पन्नाः धार्मिकग्रन्थानां विशालाः निकायाः सन्ति । ते सनातनधर्मस्य प्राचीनतमग्रन्थाः संस्कृतसाहित्यस्य प्राचीनतमस्तरं च निर्मान्ति । वेदाः वाचिकसञ्चारद्वारा श्रुतिपरम्परया एकस्मात् अपरपर्यन्तं गताः इति कथ्यते । इत्यनेन कारणेन एते श्रुतय अपि उच्यन्ते । वैदिकसाहित्ये चत्त्वारो वेदाः सन्ति । ते यथा- ऋग्वेदो यजुर्वेदः सामवेद अथर्ववेदश्चेति । प्रत्येकवेदस्य मन्त्रपाठः संहितापदेन उच्यते । वैदिकसाहित्यं व्यापकतया द्विविधं भवति श्रुतिसाहित्यं स्मृतिसाहित्यं चेति । तद्यथा-

**श्रुतिसाहित्यम्-**

श्रुतिशब्दस्य अर्थो भवति वेदः। श्रूयतेऽनयेति कृत्वा । यदुक्तं स्मृतौ मनुना-

**"श्रुतिस्तु वेदो विज्ञेयो धर्म्मशास्त्रं तु वै स्मृतिः।।"**[2] इति

श्रूयमाणत्वात् वेदस्य स्मृतित्वम् । एते पवित्रग्रन्थाः श्रुतिपरम्परयैव लब्धाः। ते संहिताग्रन्थाः, ब्राह्मणग्रन्थाः, आरण्यकग्रन्थाः, उपनिषद्ग्रन्थाश्च सन्ति । श्रुतिसाहित्यं निर्विवादं सत्यं शाश्वतं च मन्यते। उक्तञ्च-

**"प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते।**

**एनं विदन्ति वेदेन तस्मात् वेदस्य वेदता।।"**[3] इति

विश्वस्य सर्वप्रथमं वाङ्मयं भवति वेदः। भारतीयसनातनधर्मसंस्कृतेर्मूलाधारो भवति 'वेदः'। अत उच्यते- 'वेदोऽखिलो धर्ममूलम् ।'

मानवसृष्टेः पूर्वं ईश्वरो मानवकल्याणाय वेदस्य आविष्कारः कृतः, इत्यनेन कारणेन 'वेदः' अनादि एवम् अपौरुषेयश्च ।

**वेदपदार्थनिष्पत्तिः-**

'विद्' ज्ञाने इति धातोः भावे कर्मे करणे च अर्थे 'घञ्' इति प्रत्ययं योजयित्वा 'वेदः' इति शब्दस्य निष्पत्तिर्भवति। अतो 'वेदः' शब्दस्य अर्थः भवति ज्ञानम्, ज्ञानस्य विषयः, ज्ञानस्य साधनञ्चेति। धर्मार्थ-काम-मोक्षाश्च एते चत्वारः पुरुषार्थाः तदद्वारैव प्राप्यन्ते।

[2] मनुस्मृतिः2.10

[3] मनुस्मृतिः12.97

**वेदपर्यायः-**

वेदेषु ब्रह्मणः सच्चिदानन्दरूपं प्रतिपादितम्। अतो वेदः इत्यस्य पर्यायशब्दः ब्रह्म इति उच्यते। यद्यपि वेदस्य पर्यायशब्दः ज्ञानरूपब्रह्म इति तथापि वेदो लौकिकालौकिकज्ञानसाधनम् इति उच्यते।

**वेदस्य समयनिरूपणम्-**

**"अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।**

**आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः।।"**[4] इति

वेदाः कदा निर्मिताः आसन् तद्विषये पूर्वाचार्यैः क्वचिदपि चर्चा न कृता, कारणं वेदाः आद्यनादिरहिता अनन्ताश्च भवन्ति। केनचित् पुरुषेण वेदा न लिखिता इत्यनेन कारणेन वेदा अपौरुषेया इति कथ्यन्ते। मन्त्राः ऋषिभिः साक्षात्कृताः। एतेन संशयो जायते वेद अपौरूषेयः भवति चेत् स केन रचितः? कदा रचितः? एतादृशविमर्शस्य अवकाशः कुत्र अस्ति? अत एव वेदभाष्यकाराणां वेदप्रतिपादितधर्मविषये वितर्को नाभवत्। ते व्यर्थवादं स्वस्य चिन्तनस्य विषयं न कृतवन्तः। वेदव्याख्यानं तदनुरूपमाचारधर्मानुसरणं चेति शास्त्राकाराणामाग्रह अभवत्। एतत् मनसि कृत्वा मीमांसासूत्रकारजैमिनि अपि सम्पूर्णं वेदं कर्मात्मकं वर्णितवान् अस्ति।

आधुनिककाले पाश्चात्त्यजनाः वेदवाङ्मयस्योपरि सीमितवुद्ध्या विचारकर्तुमारब्धवन्तः। सर्वे पाश्चात्त्यवैदिकविद्वांसः स्वस्य तर्कवादस्य साहाय्येन वेदानाम् अपौरुषेयत्वस्योपरि सर्वदा अविश्वासं कृत्वा तस्य कालनिर्णये दुराग्रहं कृतवन्तः, परन्तु एकस्य मतम् अपरस्य मतेन सह न सङ्गच्छते स्म। एतादृश्यां परिस्थतौ कस्य मतस्य विश्वासः कर्तव्यः? कस्य निर्णयः शुद्धः एवं स्थिरः इति वक्तुं शक्यते। अस्मिन् भ्रमे न्यूनं ज्ञानिमानवाः भ्रान्ताः भवन्ति। वेदस्य अनादित्वस्य विषये संशयिनः मैक्समूलरः, ए वेवरः, याकोबी, एम्. विण्टरनित्सः, लोकमान्यबालगङ्गाधरतिलकः, इत्यादयः आधुनिकचिन्तकाः वैदिककालस्य विषये चिन्तयितुम् आरब्धवन्तः। साहित्यप्रतिष्ठाभयात् वयम् अत्र तस्य मतानाम् उल्लेखं केवलं संकेतमात्रेण कुर्मः।

**मैक्समूलरः-** 1859 इ.- मैक्समूलररचितेन 'A History of ancient Sanskrit literature' अर्थात् प्राचीनसंस्कृतसाहित्यस्येतिहासः इति ग्रन्थस्य मतेन वेदस्य कालः 1200 ई.पू.। मैक्समूलरमतेन वेदस्य चत्वारः कालाः सन्ति। ते च सूत्रकालः ब्राह्मणकालः मन्त्रकालः छन्दकालश्चेति। प्रत्येककालस्य विकासः

---

[4] म.शान्तिपर्वः 232/24

द्विशतवर्षेषु (200)जातः। सूत्रकालः 600 तः 400 ई.पू., ब्राह्मणकालः 800 तः 600ई.पू., मन्त्रकालः 1000 तः 800ई.पू. , छन्दकालः 1200 तः 1000ई.पू. च पर्यन्तं तेन सूचितम्।

**ए.वेबरः-** ए.वेबरस्य मतेन वेदस्य कालः निश्चितरूपेण न स्वीक्रियते। जर्मानविदुषोऽस्य 'History of Indian literature' अनुसारं वेदस्य कालः 1500 तः 1200ई.पू. वर्त्तते।

**याकोबी-** जर्मान् विद्वान् डा. याकोबीमतेन वैदिककालविषयकसिद्धान्तः ज्योतिषाधारेण विद्यमानः भवति। तन्मतेन वेदस्य कालः 4500 तः 2500ई.पू. इति।

**एम्. विण्टरनित्सः-** History of Indian literature अनुसारं वेदस्य कालः 2500 तः 2000ई.पू. च इति।

**लोकमान्यबालगङ्गाधरतिलकः-** लोकमान्यबालगङ्गाधरतिलकस्य मतानुसारं वेदस्य कालः 6000 तः 4000ई.पू. इति। लोकमान्यतिलकेन वैदिककालस्य चत्त्वारः विभागः कृतोऽस्ति। ते च अदितिकालो मृगशीर्षकालः कृत्तिकाकाल अन्तिमकालश्चेति। लोकमान्यबालगङ्गाधरतिलकमतेन पूर्वकाल अदितिकालः (6000-4000) इति। तस्मिन् समये वेदाः सम्पूर्णं रच्यन्ते स्म इति वक्तुं न शक्यते। अपि तु ऋषिभिः अर्धगद्यापूर्णपद्यादिषु एतादृशेषु अपूर्णवाक्येषु देवानां विशेष्यविशेषणानि शौर्याणि अभिलेखितानि च इति वक्तुं शक्यते। द्वितीयः मृगशीर्षकालः इति। एष एव कालः महत्त्वपूर्णकालः अभवत्। ऋग्वेदस्य अधिकांशश्लोकाः स्तोत्राणि च अस्मिन् काले रचिताः भवेयुः। अयं कालः 4000 तः 2500ई.पू. यावदस्ति। कृत्तिकायां वसन्तस्य आगमनपर्यन्तं एषः कालः भवति। तृतीयकालः कृत्तिकाकालः इति। अस्य कालस्य समयसीमा 2500 तः 1400ई.पू., अर्थात् वेदाङ्गज्योतिषपर्यन्तम् अस्ति। चतुर्थकालः 1400 तः 500ई.पू. यावत् बुद्धपूर्वकालः भवति। अस्मिन् काले सूत्राणि षड्दर्शनानि च निर्मितानि अभवन्। एवं ज्योतिषसाक्ष्यानुसारं वेदानां कालः 4000ई.पू. यावत् निर्धारितं कर्त्तव्यम्।

स्थितेऽपि एवंविधे विचारे वेद अपौरुषेय आद्यन्तरहितोऽनन्तश्च भारतीयैः स्वीकृतः। मन्त्रद्रष्टृभिः वैज्ञानिकैः ऋषिभिः समये समये साक्षात्कृतः इति नास्त्यत्र विप्रतिपत्तिः।

**वेदविभाजनम्-** एक एव पुरा वेदः प्रणवः सर्ववाङ्मयः इति वचनादादौ वेद एक एव आसीत्। व्यासदेवेन वेदो विभक्तः। उक्तञ्च-

**"वेदमेकं चतुर्भेदं कृत्वा शाखाशतैर्विभुः।**

**करोति बहुलं भूयो वेदव्यासस्वरूपधृक्।।"**[5]

तेन वेदश्चतुर्विधः कृतः। ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदश्च। तदुक्तम्-

**"तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः।**

**शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति।।"**[6]

**ऋग्वेदः-** सर्वेषु वेदेष्वेतेषु प्राचीनतमो वेद ऋग्वेद अस्ति। अष्टसु अष्टकेषु विभक्त अस्ति ऋग्वेदः। तत्र 64 अध्यायाः, 2006 वर्गाः, 85 अनुवाकाश्च सन्ति। किम्बा दश मण्डलेषु विभक्तेऽस्मिन् 1028 सूक्तानि 10552 मन्त्राश्च दृश्यन्ते। आसु सूक्तिषु प्रायो देवानां स्तुतयो लभ्यन्ते। किञ्चात्र यमयमीसम्वादः, सरमा-पाणिसम्वादः, पुरूरवा-ऊर्वशीसम्वादः, विश्वामित्र-नदीसम्वादः, इन्द्र-इन्द्राणी-वृषाकपिसम्वादः इत्यादीनि सम्वादसूक्तान्यपि सन्ति। पुरुषसूक्तप्रभृतीनि दार्शनिकसूक्तान्यप्यत्र लभ्यन्ते। एतदतिरिच्य लौकिकसूक्तानि आख्यानसूक्तानि चापि दृश्यन्ते। अत्र वर्णितान्येतानि सूक्तानि भारतीयज्ञानविज्ञानस्य स्रोतांसि भवन्ति। तत्र वर्णिताः श्रीसूक्त-नासदीयसूक्त-हिरण्यगर्भसूक्तप्रभृतयः सूक्तयः भारतीयसामाजिक-सांस्कृतिक-भौगोलिकवैभवं प्रदर्शयन्ति। विश्वामित्र-वामदेव-वशिष्ठ-भृगु-अत्रि-अङ्गिरादयः ऋषयोऽस्य वेदस्य द्रष्टार इति लभ्यन्ते।

ऋग्वेदस्य पञ्च प्रमुखाः शाखाः अद्यापि लभ्यन्ते। ताश्च शाकल-बाष्कल-आश्वलायन-शाङ्ख्यायन-माण्डुकायनाभिधाः। अस्य ब्राह्मणद्वयम्- ऐतरेयब्राह्मणः(शाकलशाखा), कौषीतकीब्राह्मणः (शाङ्ख्यायनशाखा बाष्कलशाखा) चेति। ऋग्वेदस्यापि आरण्यकद्वयम्- ऐतरेयारण्यकम्, कौषीतकी-आरण्यकं शांखायायनारण्यकम्वा। अस्यैकोपनिषत्- ऐतरेयोपनिषदिति।

**यजुर्वेदः-** यजुर्वेद अध्यर्युवेद इत्युच्यते। यजुर्वेदस्य द्वौ सम्प्रदायौ स्तः- ब्रह्मसम्प्रदाय आदित्यसम्प्रदायश्चेति। ब्रह्मसम्प्रदायः कृष्णयजुर्वेदस्य अन्तर्गतः, आदित्यसम्प्रदायः शुक्लयजुर्वेदस्य अन्तर्गतः भवति। वस्तुतः शुक्लयजुर्वेदः केवलं मन्त्रसङ्ग्रह एव। तस्मिन् शुद्धमन्त्राणां समावेशात् शुक्लयजुर्वेद इति कथ्यते, परन्तु यत्र मन्त्रेण सह ब्राह्मणभाग अपि लभ्यते स कृष्णयजुर्वेदः इति कथ्यते। शुक्लयजुर्वेदस्य विषयसामग्रीतः कृष्णयजुर्वेदस्य विषये पर्याप्तं परिचयं प्राप्तुं शक्यते। कृष्णयजुर्वेदविषयविमर्शात् शुक्लयजुर्वेदविषयकं परिचयमपि प्राप्तुं शक्यते, यतः तयोः द्वयोः वर्णितसंस्कारविधयः प्रायः समानाः सन्ति। कृष्णयजुर्वेदस्य 85

[5] विष्णुपुराण 3.2.58

[6] मु.उ.1.1.5

शाखाः चरण्यव्यूहेन उल्लिखिताः सन्ति। शुक्लयजुर्वेदे केवलं मन्त्राः विहिताः, कृष्णयजुर्वेदे तद्विधायकाः ब्राह्मणा अपि मन्त्रैः सह मिश्रिताः सन्ति। कृष्णयजुर्वेदस्य मुख्यशाखानां संहिताः सन्ति। ते च तैत्तिरीयसंहिता, मैत्रायणीसंहिता, कठसंहिता, कपिष्ठलसंहिता चेति। शुक्लयजुर्वेदस्य ब्राह्मणग्रन्थः-शतपथब्राह्मणम्(माध्यन्दिनीय वाजसनेयिशाखायाः), शतपथब्राह्मणम्(काण्ववाजसनेयिशाखायाः)। कृष्णयजुर्वेदस्य ब्राह्मणः तैत्तिरीयब्राह्मणः, मैत्रायणीब्राह्मणः, कठब्राह्मणः, कपिष्ठलब्राह्मणश्चेति। शुक्लयजुर्वेदस्य आरण्यकः वृहदारण्यकः, कृष्णयजुर्वेदस्य तैत्तिरीयारण्यकः मैत्रायणी-आरण्यकश्चेति। शुक्लयजुर्वेदस्य उपनिषत् ईशावास्योपनिषत्, कृष्णयजुर्वेदस्य उपनिषत्- तैत्तिरीयोपनिषत्, कठोपनिषत्, श्वेताश्वतरोपनिषत्, मैत्रायणी-उपनिषच्चेति।

**सामवेदः**-वेदेषु सामवेदस्य स्थानम् अतीव महत्त्वपूर्णमस्ति। वेदानां सामवेदोऽस्मि इत्यादिना गीतायां तदुक्तत्वात्। सामवेदः द्वाभ्यां भागाभ्यां विभक्तः। प्रथमभागः आचिकः द्वितीयभागः गानश्चेति। मन्त्रसमूह आचिकः उच्यते। सामवेदस्य प्रत्येकसंहिता पूर्वाचिकः उत्तराचिकः चेति विभक्ताऽऽस्ति। एतयोः भागयोः केवलं त एव मन्त्राः सन्ति ये ऋग्वेदे उपलभ्यन्ते। सामवेदे 1875 मन्त्राः सन्ति, येषु 1504 मन्त्राः ऋग्वेदात् संगृहीताः, 267 मन्त्राः पुनः पुनः कृताः च सन्ति। नूतनाः 104 मन्त्राः सामवेदस्य स्वकीयमन्त्राः सन्ति। एवं प्रकारेण मन्त्राणां संख्या 1875 अस्ति। सामवेदस्य ब्राह्मणाः पञ्चविधाः- ते च प्रौढ(पञ्चविंश) ब्राह्मणः, षडविंशब्राह्मणः, आर्षेयब्राह्मणः, मन्त्र( छान्दोग्य)ब्राह्मणः, जैमिनीय(तलवकारः) ब्राह्मणश्चेति। सामवेदस्य आरण्यकः तलवकार(जैमिनीयः)आरण्यकः, छान्दोग्यारण्यकश्चेति। सामवेदस्य उपनिषदः- वाष्कलोपनिषत्, छान्दोग्योपनिषत्, केनोपनिषच्चेति। भारतीयविदुषां मतानुसारं सामवेदस्य सहस्रशाखाः आसन्। पुराणेषु सामवेदस्य एकसहस्रशाखानां उल्लेख अस्ति। पतञ्जलिः महाभाष्ये सहस्रवर्त्मा सामवेदः इति उक्त्वा सामगानस्य 1000 प्रकारान् उल्लिखितवान्। अद्यापि बहूनां ग्रन्थानां समीक्षायां त्रयोदशशाखानामानि दृश्यन्ते। तेन सह तेषां त्रयोदशाचार्याणां नामानि अपि उपलभ्यन्ते। परन्तु सम्प्रति केवलं त्रयाणामाचार्याणां तिस्र एव शाखाः प्राप्यन्ते। ते च कौथुमीयः, राणायनीयः, जैमीनियः इति नाम्ना प्रसिद्धाः सन्ति। कौथुमीयसंहिता सामवेदस्य कौथुमीयशाखासम्बद्धा, राणायनीयसंहिता सामवेदस्य राणायनीयशाखासम्बद्धा, जैमिनीयसंहिता सामवेदस्य जैमिनीयशाखासम्बद्धा चेति।

**अथर्ववेदः**-अथर्ववेदस्य अर्थः भवति अथर्वणा अधीतो वेदः, अभिचारमन्त्राणां ज्ञानं वा इति। अथर्ववेदे द्विप्रकारकाः मन्त्राः प्राप्यन्ते। शान्तिकपौष्टिककर्मसम्बद्धमन्त्र अभिचारिकमन्त्रश्चेति। प्रथममन्त्राः जनकल्याणभावेन परिपूर्णाः बहुविधदोषाणां दमनं कर्तुं समर्थाः भवन्ति। द्वितीयमन्त्राः स्वकार्यसिद्ध्यर्थं

परहानिमपि कर्तुं प्रभवन्ति। अथर्ववेदस्य एक एव ब्राह्मणः गोपथब्राह्मणः(पिप्पलादशाखायाः) अस्ति। अथर्ववेदस्य आरण्यकः नास्ति। अथर्ववेदस्य तिस्र उपनिषदः- माण्डुक्योपनिषत्, प्रश्नोपनिषत्, मुण्डकोपनिषच्चेति।

मुण्डकोपनिषदि विद्यायाः कथनं वर्त्तते। परा अपरा चेति सा द्विधा। पराविद्यातः अक्षरब्रह्मणः ज्ञानप्राप्तिर्भवति। अपराविद्यायां ऋग्वेदो, यजुर्वेदः, सामवेद, अथर्ववेदः, शिक्षा, कल्पः, व्याकरणम्, निरुक्तम्, छन्दः, ज्योतिषमित्यादीनां समावेशो भवति। पाणिनीयशिक्षायां षट् वेदपुरुषाङ्गानि वेदाङ्गानि इति उच्यन्ते। तद्यथा-

**"छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**

**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।।**

**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।**

**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते।।"[7] इति।**

**वैदिकवाङ्मये भक्तितत्त्वम्-**

भारतीयसंस्कृतौ धर्म-अर्थ-काम-मोक्षसाधनेषु भक्तिः सर्वोत्तमा वर्तते। यद्यपि भक्तिशब्दस्य प्रयोगः पौराणिकसाहित्ये अधिकः अस्ति, तथापि तस्य मूलं वैदिकवाङ्मये सुप्रतिष्ठितमस्ति। ऋग्वेदस्य मन्त्रेभ्यः भक्तिवादस्य जन्म भवति। परन्तु ऋग्वेदे भागवतप्रीत्यार्थे भक्तिः इति पदस्य उल्लेखो नास्ति। भक्तिशब्दस्य मूलोपादानानि अग्नि इन्द्र-वरुणादिदेवान् उद्देश्य विरचितमन्त्रेषु उपलभ्यते यत्र ईश्वरप्रेम्णः सम्पर्को ध्वनितो भवति। यः अग्नेः उपासकगृहस्य पुरोहितः, तेन स्वस्य मङ्गललाभाय यज्ञसम्पादनं कृतम्। केनचित् अग्निना उपासकस्य समीपे पुत्ररूपेण प्रतीयते, कदापि पितुः इव उपासकाय इप्सितद्रव्यं दीयते। इन्द्रेण उपासकस्य गृहे सोमरसपानार्थम् आगम्यते, यद्वत् इन्द्रः उपासकानां समीपे प्रियजनः, तद्वत् नार्य्या समीपे तासां पतिः। भक्तानां समीपे भगवान् केवलं बन्धनस्वरुपः न, अपि तु भक्तानां प्रेम्णः आश्रयः। भगवता सह भक्तस्य सम्पर्कः प्रीत्यात्मकः भवति। ऋग्वेदस्य मन्त्रेषु देवताभिः सह मानवानां प्रीत्यात्मकसम्बन्धः प्रतिध्वनितोऽस्ति, तेन भक्तिवादस्य परिपोषणं जातम् इत्यस्मिन् विषये कोऽपि सम्बन्धः नास्ति। अतः

[7] पाणिनीयशिक्षा.41-42

भक्तिवादस्य प्रवर्तकाः भारतीयाः सन्ति तस्मिन् विषये कोऽपि मतभेदः नास्ति, अपि च भक्तिवादस्योपरि कस्यापि अभारतीयतत्त्वानां प्रभावो नास्ति।

ऋग्वेदे अनेकत्र रुद्र-विष्णु-अग्नि-इन्द्रश्च श्रद्धायुक्तं समर्पणं दृश्यते। इन्द्रं प्रति अत्र सख्यभावः दृश्यते। यथा- **"एन्द्र नूतना ऊतिभिरुप नः सख्या ईयसे"।**[8] ऋग्वेदे श्रद्धासूक्ते भक्तौ श्रद्धयाः महत्वं प्रतिपादयति। श्रद्धा एव भक्तेः मूलाधारः भवति। वैदिकवाङ्मये भक्तितत्त्वं अत्यन्तं गूढं, व्यापकं च दृश्यते। यद्यपि 'भक्ति' इति शब्दः उत्तरकालीनग्रन्थेषु विशेषरूपेण विकसितः, तथापि तस्य मूलभावना वेदेषु एव निहिता अस्ति। वेदेषु देवतानां प्रति श्रद्धा, समर्पणभावः, स्तुति, प्रार्थना, उपासना, तथा ईश्वरानुग्रहस्य कामना एतानि सर्वाणि भक्तितत्त्वस्य आधाररूपेण दृश्यन्ते। ऋग्वेदे इन्द्र, अग्नि, वरुण, मित्र, उषाः इत्यादीनां देवतानां प्रति ऋषीणां गाढा श्रद्धा तथा आत्मीयसम्बन्धभावना प्रकटिता अस्ति। **"त्वं हि नः पिता वसो त्वं माता शतक्रतो"**[9] इत्यादिमन्त्रेषु ईश्वरस्य पितृमातृरूपेण अनुभूयमानः भावः भक्तिरेव। सामवेदे गानप्रधानया उपासनया भक्तेः माधुर्यं प्रकटते, यजुर्वेदे यज्ञादिकर्मणां माध्यमेन ईश्वरसमर्पणभावः दृश्यते, अथर्ववेदे च शान्ति, आरोग्य, रक्षणादीनां कृते देवताप्रार्थना भक्तेः व्यावहारिकरूपं प्रकाशयति। उपनिषद्सु अपि परमात्मनि पूर्णश्रद्धा, आत्मसमर्पणं, तथा **'सर्वं खल्विदं ब्रह्म'**[10] इति भावनया भक्तेः दार्शनिकस्वरूपं विवेचितम्।

निष्कर्षः- वैदिकवाङ्मये भक्तिः केवलं काष्ठपाषाणादिपूजा न, अपितु निराकार-साकाररूपेण ईश्वरस्य प्रति परा प्रेमसेवा अस्ति। श्रुति-स्मृति-पुराणानां विषये भक्तिः जीवस्य ईश्वरस्य च सम्बन्धं दृढं करोति इति विषये न कोऽपि संशयः। एवं वैदिकवाङ्मये भक्ति केवलं भावनात्मकनिष्ठा न, अपितु श्रद्धा, उपासना, समर्पणं, ईश्वरानुभूतिः च इत्येतैः संयुक्तं एकं उच्चम् आध्यात्मिकतत्त्वम् अस्ति।

## सन्दर्भग्रन्थसूची

1. मनुस्मृतिः, पण्डित श्री हरगोविन्द शास्त्री, चौखम्बा-संस्कृत-सीरिज, बनारस-1

2.अथर्ववेद-संहिता, वसंत श्रीपाद सातवलेकर, बी.ए., स्वाध्याय मण्डल,

3. शङ्करभाष्यसहित छान्दोग्योपनिषद्, गीताप्रेस, गोरखपुर, सं 2013 तृतीयसंस्करण।

4.पाणिनीयशिक्षा।

[8] ऋग्वेदः 8.24.30

[9] अथर्ववेदः20/108/2

[10] छा.उप.3/14/1

6. श्रीविष्णुपुराण, गीताप्रेस, गोरखपुर, सं 2076

7. मुण्डकोपनिषद्

8.महाभारत, गीताप्रेस, गोरखपुर, सं 2072

ISARA INSTITUTE OF MANAGEMENT & PROFESSIONAL STUDIES




RESEARCH GATEWAY




AROGYAM ONLINE




PARIVARTAN PSYCHOLOGY CENTER






**भारतीय भाषा, शिक्षा, साहित्य एवं शोध**
**ISSN 2321 – 9726**
**WWW.BHARTIYASHODH.COM**

**INTERNATIONAL RESEARCH JOURNAL OF MANAGEMENT SCIENCE & TECHNOLOGY**
**ISSN – 2250 – 1959 (0) 2348 – 9367 (P)**
**WWW.IRJMST.COM**

**INTERNATIONAL RESEARCH JOURNAL OF COMMERCE, ARTS AND SCIENCE**
**ISSN 2319 – 9202**
**WWW.CASIRJ.COM**

**INTERNATIONAL RESEARCH JOURNAL OF MANAGEMENT SOCIOLOGY & HUMANITIES**
**ISSN 2277 – 9809 (0) 2348 - 9359 (P)**
**WWW.IRJMSH.COM**

**INTERNATIONAL RESEARCH JOURNAL OF SCIENCE ENGINEERING AND TECHNOLOGY**
**ISSN 2454-3195 (online)**

**WWW.RJSET.COM**

**INTEGRATED RESEARCH JOURNAL OF MANAGEMENT, SCIENCE AND INNOVATION**
**ISSN 2582-5445**

**WWW.IRJMSI.COM**

**JOURNAL OF LEGAL STUDIES,POLITICS AND ECONOMICS RESEARCH**

**WWW.JLPER.COM**